# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-6

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**खण्ड : क : अपठित-अवबोधनम्** **10 अंकाः**

**खण्ड : ख : रचनात्मककार्यम्** **15 अंकाः**

**खण्ड : ग : अनुप्रयुक्तव्याकरणम्** **25 अंकाः**

**खण्ड : घ : पठित-अवबोधनम्** **30 अंकाः**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

यद्यपि अस्मिन् संसारे बहूनि वस्तूनि सन्ति, परं विद्यैव सर्वश्रेष्ठं धनम् अस्ति। विद्यया मानवः विनयशीलः भवति, विनयाद् असौ पात्रतां प्राप्नोति, पात्रत्वात् सः धनं प्राप्नोति। धनाद् धर्मं कृत्वा एव सः सुखं लभते। सुप्रतिष्ठिते कुंले समुत्पन्नः रूपयौवनसम्पन्नः जनः अपि यदि विद्यया हीनः भवति तदा समाजे सः सम्मानं न प्राप्नोति। विद्यया एव सः सर्वविधं ज्ञानं प्राप्य आत्मनः समाजस्य च उत्थानं करोति, लोके धनं कीर्तिं च प्राप्नोति। विद्या मानवस्य मातेव रक्षां करोति, पितेव हिते नियोजयति। विद्या वस्तुतः कल्पलता विद्यते। अन्यद् धनं व्यये कृते क्षयं प्राप्नोति, परं विद्याधनं व्यये कृते वर्धते। अतः सत्यमेव उक्तम्-'विद्याधनं सर्वधनंप्रधानम्।'

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) विद्याधनं कदा वर्धते?
   (ii) कस्मात् मानवः पात्रतां प्राप्नोति?
   (iii) किं धनं व्यये कृते वर्धते?
2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) विद्यया सर्वविधं ज्ञानं प्राप्य मानवः लोके किं प्राप्नोति?
   (ii) सर्वश्रेष्ठं धनं किम् अस्ति?
   (iii) मानवः कया विनयशीलः भवति?
3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1
4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'दुःखम्' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?
   (क) सम्मानम्
   (ख) धर्मम्
   (ग) सुखम्
   (ii) 'नियोजयति' इति क्रियापदस्य कर्तृपदं किम्?
   (क) मातेव
   (ख) पितेव
   (ग) विद्या
   (iii) 'बहूनि वस्तूनि' अनयोः पदयोः विशेषणं किम्?
   (क) वस्तूनि

(ख) बहूनि

(ग) उभौ

(iv) 'कथितम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?

(क) उक्तम्

(ख) लभते

(ग) प्राप्नोति

**उत्तरम् :**

1. (i) व्ययेकृते
   (ii) विनयात्
   (iii) विद्याधनं
2. (i) विद्यया सर्वविधं ज्ञानं प्राप्य मानवः लोके धनं कीर्तिं च प्राप्नोति।
   (ii) विद्या एव सर्वश्रेष्ठं धनमस्ति।
   (iii) विद्यया मानवः विनयशीलः भवति।
3. **शीर्षकः–** विद्याधनं सर्वधनंप्रधानम्/विद्यायाः महत्वम्।
4. (i) (ग) सुखम्
   (ii) (ग) विद्या
   (iii) (ख) बहूनि
   (iv) (क) उक्तम्

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

**2. भरतः दिल्ली नगरे वसति। तस्य मित्रं सुभाषः कोलकाता नगरे वसति। सः स्वतन्त्रता दिवस समारोहस्य स्व–अनुभवान् मित्र प्रति पत्रे लिखति। पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्त शब्दैः पूरयित्वा पुनः लिखत।** $1/2 \times 10 = 5$

नवदिल्लीतः
दिनांकः ..........
प्रियमित्र (1) ..........
सस्नेहं नमस्ते।
अत्र कुशलं तत्रास्तु। अहं (2) .......... सज्जायां व्यस्तः आसम्। अतः (3) .......... तव पत्रस्य उत्तरं (4) ..........। अस्मिन् वर्षे मयाऽपि स्वतन्त्रता दिवसस्य शोभायात्रायां भागः (5) ..........। अस्माकं विद्यालयस्य (6) .......... अपि रक्त दुर्गस्य प्रांगणे स्वकलायाः प्रदर्शनम् अकुर्वन्। अहं गरबा नृत्यस्य प्रमुखः (7) .......... आसम्। छात्राणां सैनिकानाम् च ओजस्वी ध्वनिः (8) .......... गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रम प्रदर्शनानि, विचित्र वर्णानि (9) .......... लोकनृत्यानि च दृष्ट्वा अहं गौरवान्वितः अस्मि।
सर्वेभ्यः मम प्रणामाः निवेदनीयाः।
भवतः (10) ..........
भरतः

| मञ्जूषा |
|---|
| ददामि, वाद्यवृन्दम्, सुभाषः, गृहीतः, परिदृश्यानि, मित्रम्, स्वतन्त्रता दिवसस्य, वातावरणम्, सञ्चालकः, विलम्बेन |

**उत्तरम् :**

नवदिल्लीतः
दिनांकः ..........
प्रियमित्र (1) **सुभाषः**
सस्नेहं नमस्ते।
अत्र कुशलं तत्रास्तु। अहं (2) **स्वतन्त्रता दिवसस्य** सज्जायां व्यस्तः आसम्। अतः (3) **विलम्बेन** तव पत्रस्य उत्तरं (4) **ददामि**। अस्मिन् वर्षे मयाऽपि स्वतन्त्रता दिवसस्य शोभायात्रायां भागः (5) **गृहीतः**। अस्माकं विद्यालयस्य (6) **वाद्यवृन्दम्** अपि रक्त दुर्गस्य प्रांगणे स्वकलायाः प्रदर्शनम् अकुर्वन्। अहं गरबा नृत्यस्य प्रमुखः (7) **सञ्चालकः** आसम्। छात्राणां सैनिकानाम् च ओजस्वी ध्वनिः (8) **वातावरणम्** गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रम प्रदर्शनानि, विचित्र वर्णानि (9) **परिदृश्यानि** लोकनृत्यानि च दृष्ट्वा अहं गौरवान्वितः अस्मि।
सर्वेभ्यः मम प्रणामाः निवेदनीयाः।
भवतः (10) **मित्रम्**
भरतः

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



**मञ्जूषा–**रमणीया, वृक्षः, काकः, सृष्टिः, कुक्कुटः, वकः, सरोवरे, पादपाः, पुष्पाणि, जलम्, शोभा, हंसौ, नारी, दर्शनीया, प्रकृतेः

**उत्तरम् :**

1. अस्मिन् चित्रे एका रमणीया नारी वृक्षस्य समीपे तिष्ठति।
2. सरोवरे हंसौ तरतः।
3. सरोवरस्य तटे बकः, मयूरः कुक्कुटः च अस्ति।
4. वृक्षस्य शाखयोः द्वौ काकौ स्तः।
5. एतत् प्रकृतेः दृश्यम् दर्शनीया।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

**''संस्कृतभाषायाः महत्त्वम्''**

| |
|---|
| **मञ्जूषा–**ज्ञानवर्धनाय, योग्यताविस्तारः, कथाः, श्लोकाः, प्रहेलिकाः, अज्ञानं, शिक्षाप्रदाः आवश्यकम्, नाशयति, ज्ञानं, विज्ञानम्, वेदाः, पुराणाणि, रामायणम्, महाभारतम्, आर्यभट्टः, खगोलविज्ञानम्। |

**उत्तरम् :**

**संस्कृतभाषायाः महत्त्वम्**

संस्कृत भाषा ज्ञानवर्धनाय आवश्यकम् अस्ति। एषां अज्ञानं नाशयति। वेदाः, पुराणानि, रामायणं, महाभारतं इत्यादयः संस्कृत भाषायाः उत्तमाः ग्रन्था सन्ति। अनेकाः शिक्षाप्रदाः कथाः, श्लोकाः, प्रहेलिकाः च संस्कृतग्रन्थेषु एव प्राप्नुवन्ति। संस्कृते ज्ञानं विज्ञानं अपि लभते।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. हम दोनों ये फूल लेकर आए हैं।
   We both have brought these flowers.
2. ये फूलों से लदे पेड़ खूबसूरत लगते हैं।
   These flower ladden trees look beautiful.
3. पेड़ अपनी छाया से राहगीरों को खुश करते हैं।
   Trees make the passers-by happy by their shadow.
4. सिंह (शेर) जानवरों का राजा है।
   Lion is the king of beasts.
5. बच्चे खुशी से नाचते हैं।
   The kids dance happily.
6. नाटक की शुरुआत में अभिनेता अपनी पत्नी को बुलाता है।
   At the beginning of drama the actor calls his wife.
7. बाघ घास और पेड़ की पत्तियाँ नहीं खाते।
   Tigers do not eat grass and the tree leaves.

**उत्तरम् :**

1. एतानि पुष्पाणि आवाम् आनयाव। एतानि पुष्पाणि आवाभ्याम् आनीतानि।
2. एते पुष्पसमन्विताः वृक्षाः/पादपाः शोभन्ते/विराजन्ते।
3. वृक्षाः/तरवः स्वच्छायया पथिकान् तोषयन्ति।
4. सिंहः/मृगेन्द्रः पशूनां राजा अस्ति।
5. बालकाः सानन्दं/सहर्षं/समोदं नृत्यन्ति।
6. नाटकस्य आरम्भे नटःतस्य भार्याम् आह्वयति।
7. व्याघ्राः तृणं वृक्षपर्णानि च न खादन्ति/भक्षयन्ति।

## खण्डः ग 25 अंकाः

## अनुप्रयुक्तव्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. <u>मनुष्यैर्दानं</u> करणीयम्।

   **उत्तरम् :** मनुष्यैः + दानं
2. दानेन तुल्यः <u>निधिरस्ति</u> नान्यः।

   **उत्तरम् :** निधिः + अस्ति
3. मम <u>पितुः + इच्छा</u> नास्ति।

   **उत्तरम् :** पितुरिच्छा
4. नृत्यं दृष्ट्वा <u>गोपाः + हसन्ति</u>।

   **उत्तरम् :** गोपा हसन्ति
5. अधुना <u>देवः + आगच्छति</u>।

   **उत्तरम् :** देव आगच्छति

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. <u>नगरस्य समीपम्</u> उद्यानं वर्तते।
   (क) नगरसमीपम्
   (ख) प्रतिनगरम्
   (ग) उपनगरम्

   **उत्तरम् :** (ग) उपनगरम्
2. <u>तत्त्वज्ञानं</u> च धियोः गुणाः।
   (क) तत्वानां ज्ञानम् इति
   (ख) तत्वाय ज्ञानम् इति
   (ग) तत्वं ज्ञानम् इति

   **उत्तरम् :** (क) तत्वानां ज्ञानम् इति
3. राजा <u>व्रणविरोपणे</u> जाते विहरति स्म।
   (क) व्रणम् विरोपणे
   (ख) व्रणस्य विरोपणे
   (ग) व्रणे विरोपणे

   **उत्तरम् :** (ख) व्रणस्य विरोपणे
4. <u>दैवेन रक्षितः</u> न नश्यति।
   (क) दैवरक्षितः
   (ख) दैवेरक्षितः

(ग) दैवारक्षितः

**उत्तरम् :** (क) दैवरक्षितः

5. 'सूपकारः' पाचकः अपि कथ्यते।

(क) सूपस्य कारः

(ख) सूपं करोति इति

(ग) सूपः करोति

**उत्तरम् :** (ख) सूपं करोति इति

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. कोकिला मधुरस्वरेण गायति।

(क) कोकिल+आप्

(ख) कोकिला+आ

(ग) कोकिलः+टाप्

**उत्तरम् :** (ग) कोकिलः+टाप्

2. गङ्गा नदी हिमालयात् उद्भवति।

(क) नद्+ङीप्

(ख) नद+इन्

(ग) नद+ङीप्

**उत्तरम् :** (ग) नद+ङीप्

3. बुद्धिमान् जनः सर्वत्र आदरं लभते।

(क) बुद्धि+मतुप्

(ख) बुद्धि+शतृ

(ग) बुद्धि+शावच्

**उत्तरम् :** (क) बुद्धि+मतुप्

4. प्रकृतेः रमणीयता मनोरमा भवति।

(क) रमणी + यता

(ख) रमणीय + ता

(ग) रमणीय + तल्

**उत्तरम् :** (ग) रमणीय + तल्

5. विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन्।

(क) नृ + पत्वं

(ख) नृप + त्व

(ग) नृप + त्वं

**उत्तरम् :** (ख) नृप + त्व

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत-** $1 \times 3 = 3$

नयना : सुमेश! त्वं किं करोषि?

सुमेश : अधुना तु (1) .......... पुस्तकं पठ्यते।

नयना : शोभनम्! अधुना त्वं पुस्तकं (2)..........।

सुमेश : (3) .......... किं क्रियते?

नयना : मया अपि पुस्तकम् पठ्यते।

सुमेश : शोभनम्! पुस्तकं पठ।

नयना : पुस्तकं पठित्वा मया लेखः (लेख) लिख्यते।

| मञ्जूषा |
|---|
| पठसि, त्वया, मया। |

**उत्तरम् :**

(1) मया, (2) पठसि, (3) त्वया।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)-**

1. रमा चित्रं पश्यति।
2. सः प्रश्नं पृच्छति।
3. वयं विद्यालयं गच्छामः।
4. बालाः कोलाहलं कुर्वन्ति।
5. रामः रावणं हन्ति।

**उत्तरम् :**

1. रमया चित्रम् दृश्यते।
2. तेन प्रश्नः पृच्छ्यते।
3. अस्माभिः विद्यालयं गम्यते।
4. बालैः कोलाहलः क्रियते।
5. रामेण रावणः हन्यते।

**9. कालबोधकशब्दैः अधोलिखित- दिनचर्यां वा पूरयत- (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. प्रातः 6:00 ..... वादने प्रशिक्षणार्थं गच्छामः।
2. प्रातः 6:45 .......... वादने प्रशिक्षकः तत्र आगच्छति।
3. प्रातः 7:00 .......... वादने क्रीडकाः आगच्छति।
4. प्रातः 7:30 .......... वादने तैः पादकन्दुकस्य अभ्यासः क्रियते।
5. प्रातः 11:15 .......... वादने सर्वे स्वगृहं गच्छति।

**उत्तरम् :**

1. षड्
2. पादोन-सप्त
3. सप्त
4. सार्द्ध-सप्त
5. सपाद-एकादश

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. कच्छपः .......... चलति।
2. सः चौरकर्म कुर्वन् .......... आरक्षकैः न धृतः।
3. .......... मया पित्राज्ञा पालनीया।
4. मूर्खजनाः समयं .......... यापयन्ति।
5. ........ विदधीत न क्रियाम्।
6. द्वारपालः ........ अपि तत्र तिष्ठति।

7. अश्वाः प्राणत्राणाय .......... अधावन्।
8. श्रीरामम् उपेत्य भरतः ......... अवदत्।

| मञ्जूषा |
|---|
| इदानीम्, शनैः, अपि, सहसा, अधुना, उच्चैः, वृथा, इतस्ततः |

**उत्तरम् :**

1. शनैः
2. अपि
3. इदानीम्
4. वृथा
5. सहसा
6. अधुना
7. इतस्ततः
8. उच्चैः

**11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. एते मम मित्राः सन्ति। (मित्रे/मित्रः/मित्राणि)
2. ते श्वः वाराणसीम् अगच्छन्।(गमिष्यन्ति/अगच्छथ/अगच्छताम्)
3. अस्मिन् पाठ्यपुस्तके एकादश पाठानि। (पाठाः/पाठम्/पाठः)
4. भवान् सुखी भवन्तु।(भवताम्/भवतु/भव)

**उत्तरम् :**

1. मित्राणि।
2. गमिष्यन्ति।
3. पाठाः।
4. भवतु।

## खण्डः – घ 30 अंकाः

## पठित–अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** 5

भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्– "अयि शुभे! किमेवं रोदिषि? उच्यताम्" इति। सा च
विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिपः।
अहं तु पुत्रं शोचामि, तेन रोदिमि कौशिक!।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) सर्वधेनूनां मातुः किन्नाम आसीत्?
   (ii) सुरभिं कः अपृच्छत्?
   (iii) सुरभेः नेत्राभ्याम् कानि आविरासन्?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) किं दृष्ट्वा सुरभेः नेत्राभ्यामश्रूणि आविरासन्?
   (ii) सुराधिपः किं दृष्ट्वा सुरभिमपृच्छत्?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'सुतः' इत्यस्य किं पर्याय पदं गद्यांशे प्रयुक्तम्?
      (क) पुत्रः
      (ख) नेत्रम्
      (ग) अहम्
   (ii) 'अपृच्छत्' इति क्रियापदस्य कर्तृपदं किम्?
      (क) सुराधिपः
      (ख) पुत्रः
      (ग) माता
   (iii) 'इन्द्रः' इत्यस्य किं विशेषणपदं अत्र प्रयुक्तम्?
      (क) कौशिकः
      (ख) विनिपातः
      (ग) त्रिदशाधिपः
   (iv) 'अहम्' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम्?
      (क) दृष्ट्वा
      (ख) शोचामि
      (ग) उच्यताम्

**उत्तरम् :**

1. (i) सुरभिः।
   (ii) इन्द्रः।
   (iii) अश्रूणि।
2. (i) भूमौ पतिते स्वपुत्रं दृष्ट्वा सुरभेः नेत्राभ्यामश्रूणि आविरासन्।
   (ii) सुरभेरिमामवस्थां (रोदनं) दृष्ट्वा सुराधिपः तामपृच्छत्।
3. (i) (क) पुत्रः।
   (ii) (क) सुराधिपः
   (iii) (ग) त्रिदशाधिपः
   (iv) (ख) शोचामि

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** 5

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ती न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कः गुणं वेत्ति?
   (ii) वसन्तस्य गुणं को वेत्ति?
   (iii) वायसः कस्य गुणं न वेत्ति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) गजः कस्य बलं जानाति?
   (ii) निर्बलः किं न जानाति?
3. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$

(i) 'गुणी' इति कर्तृपदस्य क्रियापदं किम्?
(क) वेत्ति
(ख) करी
(ग) निर्बलः
(ii) 'काकः' इति पदस्य श्लोके पर्यायपदं किम्?
(क) पिकः
(ख) वायसः
(ग) मूषकः
(iii) 'सबलः' इति पदस्य श्लोकात् विलोमपदं चित्वा लिखत।
(क) निर्बलः
(ख) सिंहः
(ग) बली
(iv) 'गुणं वेत्ति' इत्यत्र 'वेत्ति' क्रियायाः कर्तृपदं श्लोके किमस्ति?
(क) करी
(ख) गुणी
(ग) सिंहः

**उत्तरम् :**

1. (i) गुणी।
(ii) पिकः।
(iii) वसन्तस्य।
2. (i) गजः सिंहस्य बलं जानाति।
(ii) निर्बलः बलं न जानाति।
3. (i) (क) वेत्ति।
(ii) (ख) वायसः।
(iii) (क) निर्बलः।
(iv) (ख) गुणी।

**14.अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

**विदूषकः**–(जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी?
**लवः**–तस्याः द्वे नामनी।
**विदूषकः**–कथमिव?
**लवः**–तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।
**रामः**–अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।
**विदूषकः**–(उपसृत्य) आज्ञापयतु भवान्।
**रामः**–अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः?

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
(i) ''किं नामधेया युवयोर्जननी?'' इति कः पृच्छति?
(ii) कस्याः द्वे नामनी?
(iii) सीतां वधूरिति नाम्ना कः आह्वयति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
(i) लवकुशयोः जननीं के देवीति नाम्नाह्वयन्ति?
(ii) केषां सर्वथा समरूपः कुटुम्बवृत्तान्तः?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
(i) 'अहम्' इति कर्तृपदस्य क्रियापदं किम्?
(क) पृच्छामि
(ख) आज्ञापयतु
(ग) अपसृत्य
(ii) नाट्यांशे 'आह्वयन्ति' इति क्रियायाः कर्तृपदं किम्?
(क) तपोवनवासिनः
(ख) वाल्मीकिः
(ग) रामः
(iii) 'विषमरूपः' इत्यस्य नाट्यांशे किं विलोमपदं प्रयुक्तम्?
(क) सर्वथा
(ख) भवान्
(ग) समरूपः
(iv) 'भगवान् वाल्मीकिः' इत्यत्र विशेष्य पदं किम्?
(क) भगवान्
(ख) वाल्मीकिः
(ग) उभौ

**उत्तरम् :**

1. (i) विदूषकः।
(ii) सीतायाः। लवस्य मातुः।
(iii) भगवान् वाल्मीकिः।
2. (i) लवकुशयोः जननीं तपोवनवासिनः देवीति नाम्नाह्वयन्ति।
(ii) लवकुशयोः रामस्य च सर्वथा समरूपः कुटुम्बवृत्तान्तः।
3. (i) (क) पृच्छामि।
(ii) (क) तपोवनवासिनः।
(iii) (ग) समरूपः।
(iv) (ख) वाल्मीकिः।

**15.रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. पुत्रं द्रष्टुं सः प्रस्थितः।
2. करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।
3. चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।
4. न्यायाधीशः बंकिमचन्द्रः आसीत्।
5. स भारवेदनया क्रन्दति स्म।

**उत्तरम् :**

1. कम् द्रष्टुं सः प्रस्थितः?
2. करुणापरो गृही कस्मै आश्रयं प्रायच्छत्?

3. कस्य पादध्वनिना अतिथिः प्रबुद्धः?
4. न्यायाधीशः कः आसीत्?
5. स कया क्रन्दति स्म?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत-** $1/2 \times 4 = 2$

I. सर्वेष्वृतुष्वहरहः पुम्भिरात्महितैषिभिः।
बलस्यार्धेन कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा।।

**अन्वयः-** आत्महितैषिभिः (1) .......... सर्वेषु ऋतुषु (2) .......... बलस्य अर्धेन (3) .......... कर्त्तव्यः, अतः अन्यथा (4) ..........।

II. अपत्येषु च सर्वेषु जननी तुल्यवत्सला। $1/2 \times 4 = 2$
पुत्रे दीने तु सा माता कृपार्द्रहृदया भवेत्।।

**अन्वयः-** सर्वेषु (1) .......... च जननी (2).......... (भवेत्) तु दीने (3) .......... सा माता (4) .......... भवेत्।

| मञ्जूषा |
|---|
| व्यायामः, पुम्भिः, हन्ति, अहरहः, पुत्रे, अपत्येषु, कृपार्द्रहृदया, तुल्यवत्सला। |

**उत्तरम् :**

I **अन्वयः** (1) पुम्भिः, (2) अहरहः, (3) व्यायामः, (4) हन्ति।

II **अन्वयः** (1) अपत्येषु, (2) तुल्यवत्सला, (3) पुत्रे, (4) कृपार्द्रहृदया।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-** $1 \times 4 = 4$

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहु महात्मानः समत्वमिति तथ्यतः।।

**भावार्थः**-यदा येन प्रकारेण .......... सरलता भवति तेनैव प्रकारेण यदि वाण्याम् अपि .......... भवति, तदा एव महापुरुषाः यथार्थरूपेण समत्वम् इति कथयन्ति। अर्थात् मनसि .......... च एकरूपतां सारल्यमेव .......... कथ्यते।

| **मञ्जूषा-** सरलता, समत्वं, वचसि, मनसि |
|---|

**उत्तरम् :**

**भावार्थः**-यदा येन प्रकारेण **मनसि** सरलता भवति तेनैव प्रकारेण यदि वाण्याम् अपि **सरलता** भवति, तदा एव महापुरुषाः यथार्थरूपेण समत्वम् इति कथयन्ति। अर्थात् मनसि **वचसि** च एकरूपतां सारल्यमेव **समत्वं** कथ्यते।

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत-** $1/2 \times 8 = 4$

1. व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रः पलायितः।
2. अयमेकस्तावद्विभज्य भुज्यताम्।
3. गलबद्धश्रृगालकः व्याघ्रोऽपि सहसा नष्टः।
4. श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दृष्ट्वा बुद्धिमती जम्बुकमाक्षिपति।
5. एवं बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।
6. बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।
7. बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
8. मार्गे सा एकं व्याघ्रमागच्छन्तं दृष्ट्वा पुत्रौ चपेटया प्रहृत्य जगाद।

**उत्तरम् :**

1. बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
2. मार्गे सा एकं व्याघ्रमागच्छन्तं दृष्ट्वा पुत्रौ चपेटया प्रहृत्य जगाद।
3. अयमेकस्तावद्विभज्य भुज्यताम्।
4. व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रः पलायितः।
5. श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दृष्ट्वा बुद्धिमती जम्बुकमाक्षिपति।
6. गलबद्धश्रृगालकः व्याघ्रोऽपि सहसा नष्टः।
7. एवं बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।
8. बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत-** $1 \times 3 = 3$
(केवलं प्रश्नत्रयम्)

| क | ख |
|---|---|
| वितरन्ती | आम्रम् |
| संसरणम् | वने |
| कान्तारे | सञ्चलनम् |
| रसालम् | ददती |

**उत्तरम् :**

| | | |
|---|---|---|
| वितरन्ती | = | ददती |
| संसरणम् | = | सञ्चलनम् |
| कान्तारे | = | वने |
| रसालम् | = | आम्रम् |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. कृषकः वृषभं तोदनेन नुद्यमानः अवर्तत।
(क) कष्टप्रदानेन
(ख) काठिन्येन
(ग) निश्चयेन
**उत्तरम् :** (क) कष्टप्रदानेन
2. अचिरादेव मेघरवैः सह वृष्टिः समजायत।
(क) वृषः
(ख) प्रवर्षः
(ग) सन्ततयः

**उत्तरम् :** (ख) प्रवर्षः

3. स एव वह्निः शरीरं दहते।

(क) अग्निः

(ख) खरः

(ग) सुधियः

**उत्तरम् :** (क) अग्निः

4. वसन्तस्य गुणं पिकः वेत्ति न वायसः।

(क) गजाः

(ख) काकः

(ग) तुरगाः

**उत्तरम् :** (ख) काकः

WWW.CBSE.ONLINE

Download unsolved version of this paper from www.cbse.online

This sample paper has been released by website www.cbse.online for the benefits of the students. This paper has been prepared by subject expert with the consultation of many other expert and paper is fully based on the exam pattern for 2019-2020. Please note that website www.cbse.online is not affiliated to Central board of Secondary Education, Delhi in any manner. The aim of website is to provide free study material to the students.